प्रज्ञाफलस्य टीका कैवल्यदीपिका
२७३

७१ पत्रानि

मेयोग्यता नउयाधिनि[illegible] निस्थरूपालि[illegible]सतया। पूर्वस्यापि विघ्नशान्त्यै आशिषि विदजया। मंगलायेत्याद्युक्ते तेसंदेनमु
मे। भिन्नयेति अष्टादशान्तेदया भिन्नयाप्रतत्कैना अनमिमुत्तनेणाम्बयः सोगेति। अंगानामुपसंगत्वादानायवर्गाः समूहः। अंगवर्गो
तेषामुपनविंशति अंगवर्गोनविंशतिः। तयासहवर्तते इति सांगवर्गो नविंशतिः। नकिंचिद्विशेषणं वैतत्र। ननु सप्तवर्ग इति समस्य
क्रहसके लितावर्गशब्दः कथमिह तत्स्वपनालेयप्रमुपनइति। सत्यं। किंतुज[illegible]तिसाम्यं तत्राविवक्षितमेतत्तु संख्यासाम्यं। तपवर्गी
इत्यादित्वयमुक्तेः। यद्यप्यूनविंशतिरित्यविशेषेण क्तं। तथापि प्रत्यासत्तेर्लोके [illegible] ध्येकोनविंशतिर्लक्ष्येय। नक्ते नवात
नीति। वक्ष्यमाणगोप्यारूढेन्द्रयस्तेपि नव[illegible]सावाठितत्वेन नवत्वं नवोपायप्यघटितेत्यलं। नवैवव्याख्याणेति वनव
निति विमुक्तं। नवविधेत्यर्थः। तदेवमुपास्यसमसाधनोपासितृपायसवन्धस्ति त्रयप्रकरणोद्दिमुक्तं। अयमेव पादयतुष
॥विघ्नरूपवात्मकवर्दिनन्मावृष्टादशाशेदया। सांगवर्गोन विंशात्या नक्तेमेवचिंताश्रित॥१॥ ॥ ॥ ॥
याधिः। क्रमात्प्रकरणय्नुष्क्रणोभिधास्यते। एतावानेव मागवतेऽनुष्ठेयोऽर्थः। फलं त्वत्रैवोक्तमिति न पृथग्दर्शितं। म
राधयाजनादयुक्तधर्मः प्रोक्तितद्यत्त्ररीक्रायामुक्ताः। इहानुसंधेया। तत्रैव वल्पलाभः प्रयोजनं। नाकिंयोगो विधेयः।
निर्मत्सरत्वविशिष्टसत्वमर्थिका विशेषणं। नवर्णाश्रमादि। मत्सरो परोत्कर्षासहनं। सत्वमास्तिकत्वमिति। मूलविघ्न
क्षीणत्वात्मुपास्यादीनां प्रसंगात्तत्त्वासंक्रेतल विवृ[illegible]लयैकत्र प्रतिपत्तिर्निहावांतजप्रयोजनं। अतएव तदप्रकरणमिल
[illegible]ल। यथाहुः। शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितं। आहुः प्रकरणं नाम ग्रंथभेदं विपश्चित इति। इहैवव्यक्त
कैवोपियदुनाजमहाम[illegible] माद्रिणमान्यायन[illegible] कत्वं व्याख्यातवान्। तदेवाह। विघ्नविनाशादि।

चतुर्णां धर्मादीनां वर्गश्च वर्गः । तत्र श्रेष्ठसमर्थ्यो ग्रन्थश्चि तामणिः । मणिर्हि योगि सान्निध्यानात्स्वर्गीला । तस्या हेमाद्रिकृतादि
भेदान् जगामणान् । गणेशोर्निर्जितान्द्विगुणम् लिखू । विहाङ्गि णयामास स्वर्थः । अन्यत्रास्थितमनोरतादि वाक्यानायुक्तान्
कत्रलेखनीनुस्यूयं निष्पादनमित्यर्थः तिगणेयते स्थितिः । व्रतादि भेदांश्च क्रमाद्व्रतदानतीर्थमोक्षपरिशेषपूर्वैर्वृत्तेषु सु
स्वैश्चैषु । मोक्षवर्त्मानि मोक्षोपायाः । मूर्तयः प्रतिमाः । प्रासादा देवकुलानि । गणाध्यक्षणेः । गणेशेषु देशान्तरेषु यो नायु
ष्पयोर्लिखनेषु प्रयणान्मुख्यः ॥ विष्णवादीनां चतुर्णां द्वंद्वः । तेषां भेदानि सत्या । ननु नाद्यशिलस्य त्रयस्य भिन्नेषु ग्रंथे कृतेषु विं
नपचमयाशिष्टं यदयमस्यारंभइति तत्राह । उक्तसानधीरिति । उक्तेष्वव्रतादिष्वपि सावधानेष्वपि विष्ण्वादिविषयेषु धीर्यस्य
॥ विष्णुप्रीत्यै चतुर्वर्गचिन्तामणेः भजगिणान् । भेदान्व्रतादानतीर्थानां मोक्षवर्त्मनी ॥ २ ॥ मूर्तिप्रासाद
पूजानां हेमाद्रिर्गणकाग्रणीः । विष्णुमजगजकानां गणसूक्तसावधानः ॥ ३ ॥ ॥
मतया । आष्कृतास्तीनमदानकुसुमोत्करं ही विभुः । नेयदुःखरूपस्यानाविस्तादिदर्शनाद्यधिश्च नये वकुर्वा हि ॥ अय
मर्थः ॥ प्रथमं जगवस्यात्यर्थ उद्यावरा निष्केयाग्रयिष्ठानि सोपायान्यनेकानि स्थानि यहिनि गानि ब्रतदानादीनि तत्रगणि
तानि । ततस्तेषु चतुष्ट्रस्थाद्विलक्षणं मोक्षैकफलं उपायं प्रकटयितुमिदमवतारकम् । ननु व्रतादिभेदाश्चिन्तामणिनागाणि
तात्विष्ण्वादिभेदा । पुनरुक्तेनेति तत्राह । मुक्तेति ॥

ग्रंथनं ग्रंथः संदर्भः सोऽस्मिन्नस्तीति ग्रंथं ग्रथनं। अर्शआदित्वादच्। यत्राभिन्नरूपेणशब्देन तद्वतोऽभिधानं तत्सर्वमिहेति हि दर्शितमुक्ताः

यद्वा। ग्रंथशब्दो नपुंसकेप्यस्ति। तथाहि। पाणिनिनास्वकीये लिंगानुशासने ध्योपधश्च लाधिकृत्य काण्डकुण्ड[illegible]ग्रंथानि नपुंसके। तीर्थत्रो

यद्यूपग्रंथानि नपुंसके चेत्युक्तं। मुक्ता नाम वल्ली तस्याः फलत्वेन। गतः सङ्कालो यत्रासौ मुक्तानां जन्म वल्लिषु। वर्णितेसो प्रतितास्ते

हेतवः शुक्तिसंपुटाः। इत्यादि दर्शनाद्वल्ली जमप्यस्ति मौक्तिकं॥ यद्वा मुक्तास्फोटा मुक्तानदीयफलं। वस्तु यदिन गोदेयेत्[illegible]पदलो

पार्णिमादिवत्। ग्रंथपक्षे तु मुक्तानां अफलप्राप्तोपेयलात्। ग्रंथः संकल्पः का का व्यंजनीयः। अर्थान्मुमुक्षार्थिनां फलदः। यद्वा मुक्तानां

वा मुक्तामुक्तत्वसाफल्यं यत्र ग्रंथे तत्तथा। सर्वेषां मुमुक्षूणां फलदमित्यर्थः। ग्रंथनलयोः साधर्म्यमाह। सदिति। सती प्रसस्ता नागव

नमेव मुक्तिजन्मस्थानं यस्य तत्तथा। भक्तिर्भजनं [illegible] अनुरागः स एव बन्धस्थानं तु यस्य तत्तथा तेन। यथा देशविशेषस्यातिपयः शुक्तिसं

॥ मुक्ताफले न ग्रंथेन सद्रागवत मुक्तिना। भक्तिस्वान्तबुनां मुग्धमा[illegible] यष्टि मुमुक्षुप्रिया॥२॥

पुटे मुमूर्छितमौक्तिकं भवति। तथानुराग एवास्य ग्रंथाक्रान्तेपवर्णित इत्यर्थः। कः पुनरस्यालंकार्य इत्याह। मुग्धेति। मुग्धोभावः पुंवत्

मार्कण्डेयो यस्मिन्न विशेषो विष्णुरूपे विज्ञो स तथा। तस्य श्रीशोभा यस्मात्तत्तथा तेन। जातिपुरस्कृत्य द्विजाभावः। मार्कण्डेयो ह्यपि

भवति पुनः [illegible] भगवन्मायां दिदृक्षुर्नातिदीर्घतपस्याप्यमानः क्षुद्रा विस्मयेन भगवता प्रकटितायां मायायां निखिललो

कसङ्गवादके मुकुन्दजनोन्मज्जनानि जगन्ति कल्पस्याद्यपर्णसंपुटे शयानमालोक्य दलं भगवद्बालमालोक्य मुमोह। यो हि मुनिः पुनि

कल्पल। दिविभ्रमेन यत्रासमसौ सोप्यत्र मुग्ध इति। विशेषाः सुंदरत्वमुक्तं। तस्याप्येतद्दलकानन्दत्वमतिशायि। एवं च मुक्ताफलप्रायेणवा

नामलेश मालि तिमागिविशेषाणां। यथा मौक्तिक[illegible]कामितदिह[illegible]विसर्गस्यात्मप्रसादनायतद्धि दमपीति रूपकार्थः। न

न्येव मध्यन्ये पुगं येन नलेष्यय सत्तु किमनेनेति तत्राह। मुक्तेति॥ ३॥ ॥

प॰

...स्फुरन्तश्चैताः संबद्धाः स्फुरन्नक्किभेदाः प्रत्यग्रनाजितालसत्पदाः पद्मरागाः शोणरत्नानि यस्मिन् तत्तथा । स्फुटः स्पष्टो नक्किभेदो नखना
विशेषो येषां पद्मरागाणां ते तथा । प्रत्यग्रा नाजिता लसौंदर्यं येषां ते तथा । नाजिनेतिकांतेर्वा अस्यं तु श्रीं तिमेतद्वक्तुये । तया लसच्छोभमानं
पदं स्थानमाश्रयो येषां ते तथा । हेमाद्रिर्मेरुस्तत्तुल्यं वपुः सुवर्णकृतं तस्य निवेशो विन्यासः । तेन तन्मयमपूर्वं हेमाद्रिसन्निवत्वेन कनक
कस्य प्रत्यग्रत्वमुक्तं । तदेतदस्तु मुक्ताफलखचितपद्मरागजांबूनदमौक्तिकं भगवताप्रसादीकृतमिव कंठे कुरुध्वं । कुरुत क्रियासामान्यवा
चित्वात् आमुंचध्वं । हे कुशला इति शेषः । आत्मनेपदाच्च क्रियाफलस्य कर्तृगामित्वं । तदाह । अवेति । अवबुध्यं आवध्यं । लज्जां मोचां । अ
पूर्यंतेत्येताः तत्संबंधादनुमृता । अत्र तु स्फुरस्वन अप्रयासेन धितैः संग्रहीतैः परस्परविविक्तैर्नकैर्भेदैः विहिता विहितादिनिःसृ

३ ॥ मुक्ताफलखचितस्फुरन्नक्किभेदप्रत्यग्रनाजितलसत्पदपद्मरागं । हेमाद्रिसन्निवसुवर्णनिवेशनम्यकंठे २
कुरुध्वमवबुध्यमपूर्वलक्ष्मीं ॥५॥ तत्रादौ विशेषप्रकरणम् ॥ ॥

लक्ष्यं लक्ष्यते लक्ष्यते अजितस्य विष्णोः लसतो शोभमानयोः पदयोः पद्मयोश्चरणांबुजयो रागो यस्मिन् ग्रंथे तत्तथा । विस्पष्टः प्रदर्शि
तो भेदो द्विभेदो द्विविधो यत्र तत्तथा । मौक्तिका कामानर्थ निवर्तत्वं यथा । हेमाद्रिः पुरुषविशेषः तत्संभवानि तेनोद्यापितानि सुवर्णेषु स्थापितानि वर्णा
निलक्षणानि तेषां निवेशेन तत्र तत्रोचितस्थाने विन्यासेन रम्यं मनोज्ञं । वर्णग्रहणेन च शब्दानां स्वच्छत्वमुक्तं । तत्कंठे कुरुध्वं कंठस्थं यथा २
स्यात्तथा । स्मरत धारयतेत्यर्थः । लक्ष्मीं आत्मत्रसाहस्र्यां शोभां । अपूर्वां अन्येषां तेषुलैर्ध्यां । एवं श्लोकचतुष्केण पूर्वं तंगं विधाय प्रस्तुतमारभ
ते । तत्रादौ ॥ आदौ तु उद्दिष्टक्रमानुरोधात् । विशेषप्रकरणं विशेष्यः प्रतिपाद्यः स च सामान्यविशेषावष्टब्धत्वाद् द्वेधा । तत्र सामान्यपूर्वविशे
विशेषप्रतिपादिनीति सामान्यलक्षणं च कुमाह । तत्रेति । पदो विशेषा । महमिति ॥

५२

भेदाविशेषाः। अहमित्यादि। अहमेवेति कर्त्रैतनस्यप्यावृत्तिः। आसमेवेति क्रियांतरस्य। अग्रेमायासंबंधात्प्राक्। मायासंबंधेऽपियत्स
त्कार्यंमसत्कारणंपश्चपरतात्पातन्नमदन्यत्र्। मायासंबंधादहमेवत्रिधाविभक्तइत्यर्थः। पश्चात्मायावियोगादनंतरंमहमेव। प्रपंचस्यार
दिमध्यावसानेष्वहमित्यर्थः। यदेतत्प्रपंचरूपंतदप्यहं। नान्यत्रसिद्धमध्यारोपितं। यथान्यत्रसिद्धः सर्पोरज्जौ। एवंविवेचनाङ्गमेनिवर्तयो
वशिष्यतसोहमस्मि। इदंतयास्वरूपस्यनिर्देष्टुमशक्यत्वादिवमुच्यते। एतेनयथाक्रमंत्रयादिष्ववस्थात्रयेषुवर्णत्वमेवसत्यं। तथाजगद।

तत्र
॥ विष्णोर्लक्षणंभेदाश्च ॥ ॥ अहमेवासमेवाग्रेनान्यद्यत्सदसत्परं। पश्चादहंयदेतच्चयोवशिष्येत
सोस्म्यहं ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

३
दिमध्यांतेष्वनुस्यूतेसत्तामात्रंभगवत्स्वरूपमितिलक्षणार्थमित्युक्तं। नतावदस्यासंभवः। सदेवसोम्येदमित्यादिश्रुति
सिद्धत्वात्। नचघटालाकाशादिषुअतिव्याप्तिः। तदुत्पत्तेःश्रुतत्वात्। विमतमनित्यंवाध्यत्वात्। मुक्तिरप्यवदित्यनुमानात्
च। नापिसाध्याविभुयन्तुर्ध्वतिव्याप्तिः। तेषामाभासानतिरोहितत्वात्। तस्मान्निर्दोषंलक्षणं। अत्रचप्रथमयावक्तुर्निर्देशः
द्वितीययाश्रोतुः। विष्णोः। अहमाणे। इहयच्छोकानांचतस्र्णांधाध्याययोज्ञानार्थिक्रमादेवन्यासः। ६ ॥ २८। ॥

सां०मु०का० एवंसामान्यलक्षणमुक्त्वा विशेषाल्लक्षयितुमाह ॥ सद्वेधेति । द्वेधात्वमेवाहनियेति ॥ अनवच्छिन्नेव स्कन्ध्यवच्छेदवदुपाधिना ।
कारः तेन रहितो निराकारः । तत्सहितोऽन्यः । तत्राद्यं लक्षयति । अनवच्छिन्नेति । सद्वेति द्वितीयं लक्षयति ॥ ७ ॥ अस्यैव भेदान्
हा सचेति । स साकारः । तत्राद्यभेदमाह । रजस्तमोभ्यामिति । तुल्याभ्यां रजस्तमोभ्यां युक्ते सत्वे प्रतिफलितं चैतन्यं पुरुषशब्द
र्थ इति प्ररूपणीयं । एवमुत्तरत्र । रजस्तमोभ्यामिति तृतीयया तयोरप्राधान्यं । सहयुक्तेऽप्रधाने इति स्मरणात् । तेन पुरुषे सत्वब
हुलं रजस्तमश्च तदपेक्षया न्यूनमित्यर्थः । ननु त्रीणि समान्येव । त्रिसाम्यस्य प्रकृतिलक्षणत्वात् । स्तोकाधिक्यभावश्चैषां कार्यगम्यो ।

॥ सद्विधा ॥ निराकारः साकारश्च ॥ अनवच्छिन्नचैतन्यं निराकारः ॥ सत्वावच्छिन्नचैतन्यं साकारः ॥
७ ॥ स चतुर्द्धा ॥ रजस्तमोभ्यां युक्ते सत्वे पुरुषः ॥ रजसा ब्रह्मा ॥ तमसा रुद्रः ॥ ॥ ७ ॥ ४

ननु माषादिमूर्त्तद्रव्यवद्रूपप्रत्यक्षः । युक्तग्रहणं द्वयोर्वर्तते । सत्वग्रहणं त्रिषु । द्वितीयभेदमाह । रजसेति ॥ ७ ॥ रजसा युक्ते
सत्वे ब्रह्मा । अत्र रजमात्रया विद्यमानमपि तमो रजसः प्राधान्यं वक्तुं नोक्तं । न तु तन्नास्त्येव । तत्कार्यस्योपलम्भात् । तृतीया
तु प्राग्वत् । तेन प्रबलीभूतमस्तोकं तदपेक्षया रजः न्यूनमित्यर्थः । रजसः प्रागुक्तिः । सत्वापेक्षयाऽल्पत्वात् । तुर्यप्रकरणानुक्तो
धात्र । तृतीयभेदमाह । तमसेति ॥ ७ ॥ अत्र रजोमात्रानुबोधादि पूर्ववत् । चतुर्थमाह । शुद्धे विज्ञानेति ॥ ७ ॥ ॥ ॥

तथा हि

शुद्धेन जस्तमोभ्यामस्पृष्टे सत्त्वे विष्णोरेव । विष्णुसंज्ञैव क्रियते न तु तत्रान्तरवत्संज्ञान्तरमित्येवशब्दार्थः ॥ छ ॥ तमेन विशुद्धोऽसितस
त्वान्न सदाशिव इत्याचक्षते शैवाः पशुपतिरिति पाशुपताः । पुरुषोत्तम इति पाञ्चरात्राः । आदिविद्वान्सिद्ध इति सांख्याः । ईश्वर
इति पातञ्जलाः । इह तु तस्य विष्णुसंज्ञैवायद्वा ॥ विष्णुपवाल्लभमित्यत्र पर्वानामपि विष्णुसंज्ञा मुख्या यत्तु णसंज्ञान्तरमपकृष्टं
शुद्धसत्त्वोपाधिकस्य विष्णुसंज्ञ एवेत्येवशब्दार्थः । ते च ब्रह्मविष्णुरुद्राः । प्रत्येकं आधिदैविकादिभेदात्त्रिधा । एवमुपाधिसंभेदात्स्व
स्वरूपतामुक्त्वा इदानीमनन्तु सहितोपाधिरूपविहितप्रत्ययायोगादुपाधीन्लक्षयति । अगोचरेति । अगोचरस्य अविषयस्य

॥ शुद्धे विष्णोरेव ॥ छ ॥ अगोचरस्य गोचरत्वे हेतुः प्रकृतिगुणः सत्त्वं ॥ ॥ गोचरस्य वक्ररूप
त्वे रजः ॥ छ ॥ वक्ररूपस्य तिरोहितत्वे तमः ॥ छ ॥ तथापि तस्य समुदासीनत्वे सत्त्वं ॥ छ ॥ ॥

तस्य वस्तुनो गोचरत्वे विषयीभावे हेतुर्यः प्रकृतिगुणः तत्सत्त्वमित्यर्थः । हेतुः प्रकृतिगुण इत्युभयत्र पर्यस्यनुवर्तते । गोच
रस्य सतो यत्सर्वथाज्ञानात्वं तद्रजः । तस्यैव तिरोहितत्वेऽज्ञानेनात्मनावस्थाने हेतुस्तम इत्यर्थः ॥ विनाशे इत्यनुवृत्त्यास
कार्यप्रपञ्चाश्रयणात्तिरोहितत्वे इत्युक्तं । एवमाधिदैविकोपाधिस्वरूपमुक्त्वा आध्यात्मिकोपाधिस्वरूपमाह । तथेति
॥ छ ॥ अयमर्थः ॥ यत्तस्य त उदासीनमित्यादिपदत्र उदासीनत्वे तु सत्त्वं ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

मुक्त्यद्भुतनेस्पष्टे । आधिदैवाध्यात्मिकोपाधिलक्षणादधिभूतोपाधिस्वरूपमपिलक्षितं । येनहिएकस्मिन्वस्तुनिद्विरूपो
विच्छेदः असावाधिभौतिकः ॥ तदुक्तं ॥ योऽध्यात्मिकोयंपुरुषः सोसावेवाधिदैविकः ॥ यस्तत्रोभयविच्छेदः सस्मृतोऽ
ह्याधिभौतिकः ॥ ततः परिसिद्धशेषमिति नेहोक्तमितिभावः ॥ उक्तान्गोयत्वादीन्उपाधिमस्तुउन्मीलयितुमाह ॥ गो
यत्वेति ॥ छ ॥ गोयत्वत्वद्भूपत्वतिगोहितत्वानिक्रमात्स्थित्यादिशब्देतुख्यातइत्यर्थः ॥ नयैवंसृष्टिसनत्वनस्थितिति
॥ उपक्रान्तिवेगजः ॥ अपक्रान्तिवेतमः ॥ ॥ छ ॥ ॥ गोयत्वादीनिस्थितिसृष्टिसंहाना ॥ ५
तिविशुद्धत्वशंका ॥ स्थितिसृष्टेचक्रत्वात्सृष्टेः ॥ स्थिताहिहरदादयोघटाघात्मनासृज्यन्तेनास्थिताइति । अतएवोक्तं । सत्वं
त्रिलोकस्थितयेस्वमायया विभर्षिशुक्लंखलुवर्णमात्मनः । सर्गायरक्तं रजसोपबृंहितंकृष्णंचवर्णंतमसादिनात्य ॥ ॥ ॥ ॥
येद्रूति ॥ एवमाध्यात्मिकेषपीत्याह ॥ उदासानेति ॥

॥अयमर्थः॥यदिदंवैचित्र्यादिरूपप्रपञ्चनापञ्चानवैष्णुर्येनावस्थानंसास्थितिः।उपचयात्मकत्वेनसृष्टिः।अपचयात्मकत्वेनसंहारः॥त
त्रजगत्स्थित्यादिहेतवआधिदैविकाः।अध्यात्माध्यात्मिकाः।सुनन्दादयःअवतारास्सर्वेविनाशकाः।सतुपुरुषः॥त्रिविक्र
मावतारत्वात्।यथोक्तं॥तयोर्विष्णुर्नरेवाहमदित्यामासकश्यपात्।उपेन्द्रइतिविख्यातोवामनत्वाच्चवामनइति।अतए
वतत्रतत्रविश्वरूपप्रपञ्चरूपंस्वरूपंदर्शितवान्देशवात्सल्याद्वाबृहस्पतेर्वाचापिकुशस्थलीमूर्तौत्रैविक्रमंचिह्नंकृष्णस्यपदेशाश्च।
अतएवप्रह्लादसंहितायांद्वारकामाहात्म्येतृतीयेऽध्यायेवैकुण्ठमलकंतोक्षिप्यनःभगवतासकलंनिजंतत्जङ्गमस्यांमूर्तौ
विन्यस्तमितिदर्शितं॥ ॥तथाहि॥यत्रत्रैविक्रमीमूर्तिर्विहरतेयत्रगोमती॥नवाम्मुक्तिःप्रयासस्थेतिचक्रतीर्थेनसङ्गतातत्कले
वरंपवित्यत्क्रमेणासहरिणातदा।कलाभिःसोहितंतेजस्तस्यांमूर्तौनिवेशितं।तस्मात्कलियुगेविप्रानान्यत्रप्राप्यतेहरिः॥यदि

॥उदासीनत्वादीनिच॥ ॥छ॥

कार्यहिकस्तेनतत्रगच्छतमायिरामिति॥तया॥आदौत्रिविक्रमइतिख्यातिर्वासीन्महातले।कृष्णस्यानुकूलान्यासात्क
ज्ञइत्यभिधायतत्पुति।यत्तुसर्वविशुद्धमित्यादिनाशुद्धसत्त्वतासंक्रान्तेन।तत्रत्रयस्त्वविषयंननुयथाश्रुतमेव।गुणां
नकार्यस्यानुपलम्भात्।तत्रतदसत्समन्यत्रनुसत्यमितितुचाक्षिमात्रंतस्मात्तुतुवएवायमितिसंतोषश्चनिष्कृष्टंयच्चतदनुपपत्ति
सात्।यथावैताब्रह्मादिमूर्तयोगुणमूलाः।तथाहास्मादयोऽनसाधुनकूलाएवेत्युपरिष्टात्प्रवेदयिष्यामः।किंबहुनातत्त्रितय
एषवैदिकदेवतैवपुनः।सत्त्वप्रकृतिर्जैर्गुणैःपदेशिःस्यात्त्रिनिर्गुणे
तारतम्यतोविष्ण्वाक्रान्तमिदंविश्वं॥ ॥तदुक्तं॥ ...मुसंख्याविशेषस्यापर्ययागममाह॥तौष्ठितं॥ ॥
ति।एवमुपाधिस्वरूपंनिर्धार्यायाहितमुसंख्याविशेषस्य

श्रीगुरु॥तेषुस्थितिसृष्टिसंहारेषुविद्यादयः क्रमान्निमित्तं।कुलालइवघटस्य।पुरुषउपादानसमवायिकारणं।घटस्येवमृत्।द्रव्य
यकारणद्वयपूर्विकाकार्यप्रवृत्तिः।असमवायिकारणंतुनिमित्तांतर्गतमेवेतिपृथङ्नोक्तं।अतएवान्यत्रादितन्त्रश्चेतिग्रंथमस्त्रो
केद्वयमेवोपात्तं।गोचरत्वेप्रतीतिविषयत्वेतुनिर्विशेषंचैतन्यंहेतुः।तस्यचास्मासमर्थमिदंविज्ञातितोक्रतेः।तत्रश्चस्थित्य।

6 ॥तेषुब्रह्मविष्णुरुद्रानिमित्तंपुरुषउपादानंगोचरत्वेतुचैतन्यं॥ ६
॥एवंपञ्चभेदाः॥ तत्रनिराकारः॥ ॥छ॥ ॥

दिनिमित्तत्वार्थेत्रयः।उपादानार्थेचैकः।गोचरत्वार्थमन्यश्चेतिविकल्पपञ्चात्मकंइत्यत्रपञ्चैवोक्तानन्यूनाधिकाइत्यतिप्रे
त्याह।एवमिति॥छ॥नचैवमेकःसामान्यात्माविशेषरूपाश्चपञ्चेतिबहुमार्गक्रियाविशेषपरिहारेसामान्यस्यानवस्था।
नात्र।एवंतावत्पञ्चवस्तूनिस्वयंलक्षयित्वातदेवग्रंथारूढेनलक्षणेनद्रढयितुमाह।तत्रेति॥ ॥छ॥ ॥
॥निराकारइतिनिराकारस्यलक्षणंकथ्यतइत्यर्थः॥ ॥छ॥छ॥ ॥छ॥ ॥छ॥ ॥

दू५

॥तत्रापि नयत्रेतितरस्यस्य। परं पदमिति स्वरूपस्य॥ तत्परं वैष्णवं पदं आमनंति। विष्णुनाधिष्ठितं यत्ताधिष्ठितवत्। ब्रह्मादिप
दानामपि विष्णुनाधिष्ठितत्वात्तन्नमित्युक्तं। विष्णुनैवाधिष्ठितमित्यर्थः। यत्र पदे कालो नास्ति। यः अनिमिषां ब्रह्मादीनां परः प्रभुः सं
हर्त्ता। महाप्रलयेपि नाशो नास्त्येवेत्यर्थः। अत एव कालातीतं वे किं पुनर्न्यायेन देवा। अपि तत्र न संतीत्याह। कुतो न्विति। तथा देवा
भावे जीवा अपि न संतीत्याह। कुं जगतामिति। ये देवा जगतां उच्चावचा गतीर्गच्छतां जीवानामभीशाः। तेषां का वार्ता तत्कृत विघ्नाधो
पि नास्तीत्याह। ऊर्मिभिर्नैश्चानिलत्वयोतनार्थे लिट्प्रयोगः। यत्र वपदे सत्वादिर्नास्ति। सत्वमिंद्रियदेवतारूपं। न रजः इंद्रियं। तमइं
द्रियार्थरूपं। विकारोऽहंकारः तेषां त्रयाणां कारणं महान् बुद्धितत्वं। तदहंकारस्य। प्रधानमव्यक्तं। तन्महतः सत्वाद्यभावादेत
स्याभवतो। पुनर्जन्मादिशंकावाजलेशोपि नास्तीत्यर्थः। एवं दुःखं नास्ति सुखं सुखमस्तीत्याह। यन्नेतीति। परं विष्णुपदं इह
॥नयत्रकालोनिमिषांपरःप्रभुः कुतोनुदेवा जगतांयईशिरे। नयत्रसत्वं नरजस्तमस्तत्र वैविकारो नमहान्प्रधानं॥
॥७॥ परंपदं वैष्णवमामनंतियन्नेति नेतीत्यतदुत्सिसृक्षवः। विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगुह्यार्हपदं
पदेपदे॥ ८॥ स्प२
दामनसाउपगूह्याश्लिष्य अनन्यसौहृदाभवंति। अन्यत्र विषये प्रीतिं त्यजंति। नाहं कुत्सुखवाभावात्। तद्धि पदे पदे क्षणे क्षणे अर्हं पदं
अर्हणस्य आदनस्थानं। उत्तमोत्तरत्वमलंकरणीयत्वात्। दौरात्म्यं विसृज्य अनादिदुर्वासनावासितत्वं त्यक्त्वा। विषयान्तरसमतिनादि
नास्तीत्यर्थः। नेतिनेतीत्युपनिषदुपदेशविश्वासबलात्। अतत्परं विष्णुपदादन्यत् उत्सिसृक्षवः त्य[illegible]यैवोत्स्रष्टवंतः। नित्यानित्यविव
भ०व२ यस्तु ख्यातुरूपे विष्णुपदे अनुरक्तिता अन्तरनवबंधत्रबवनायतति केवलं कर्माणि अतदत्त्वेनो बांते। नानिहंतुरवार्थमुपादायंते। सत्य
नुत्तवेकुत्सअंते। अतत्परत्वादंतनायतत्वात्। एवमस्याधिविचल ... अधीयीक्षाणिमाह॥ इत्यमिति॥

तथा २ अयमर्थः २

मु॰ का॰ ॥इत्थंव्यवस्थितः अनेनप्रकारेणविशिष्टामवस्थामापन्नोमुनिस्त्रुपसमेत्यवाक्ति विलुप्तोत्र। यतोविज्ञानस्यविशुद्धज्ञानरूपस्यविशोधि
कुदर्शनेसाक्षात्कारः तस्यैवायंवलतेनुप्रबुध्यतोयथापुनर्नोदेति हिंसितः आशयोजीवत्वोपाधिर्येनसतथा॥छ॥ वक्ष्यमानरू
मिकोपासनाक्रमबलात्सत्वपुरुषान्यथाख्यातिमापन्नत्वामपिसायुज्यार्थीनिनोदुकामद्वत्वेनामवस्थामापन्नोमुनिरत्राधिक्रियते।
नान्यः। अवश्यंबाधिकानिनिद्रातार्थैत्यमित्यादिहेय। अन्यथास्योद्गमनेनिःप्रयोजनस्यात्। ध्रुवः वाजानी॥स्व॥ पुरुषलक्षणम्।

॥इत्थंमुनिस्वरूपमेवंव्यवस्थितोविज्ञानदग्धवीर्यःसुदग्धिताशयः। स्तैर्यदापर्वनिरात्मसृष्टैःपुरंविराजं ७
विनश्यतस्मिन्॥स्वांशेनविष्टःपुरुषाभिधानमवापनारायणआदिदेवः॥१०॥ ॥छ॥ ॥

ह। स्तैरित्यादि॥छ॥ आत्मसृष्टैः आत्मनाप्रकृतिमधिष्ठायसृष्टैःपुरंदेहंविराजंब्रह्माण्डंविनश्यनिष्पाद्यतस्मिन्स्वांशेनअ
वक्तव्यायदाविप्रविष्टः तदापुरुषसंज्ञामवाप। पुरिशयनाद्वापुरुषः अनेनसोपाधिकोक्तिः कल्पनया। नारायणः जलशायी। आदि
देवोनिराकारः। एवंतस्यलक्षयित्वास्वरूपंलक्षयति॥ यत्कायइति॥

ष्टः २ हसना २

॥एषद्रूपमानः भुवनत्रयस्य सन्निवेशो यथायथं स्थितिः। यस्येन्द्रियैः दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रप्रजापतिभिरधिष्ठा
दितानुगतानि ज्ञानकर्मभेदाद् इन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थाः। स्थितः स्वस्थावृत्तत्वचरूपादिति
यावत्तनुभूतानि ज्ञानि। यस्य श्वसनतः प्राणाद्बलत्वादिन्द्रियाणां पाटवं। ओजो मनसः। ईहा कर्मेन्द्रियाणां। सत्वादिभिस्त्रिविधैः
स्थित्यादेः आदिकर्त्ता प्रथमं कारणं उपादानत्वात्। विश्वादयस्त्रयः पश्चात् ईश्वरनिमित्तत्वात्। एवं विनाकारणं घुतुपोल जयिताब्र
ह्मादित्रयं लक्षयति। ब्रह्मेति॥ ॥ सत्यागुणः पुरुषः आदौ शतधृतिर्ब्रह्मा भूत्वा रजसा उपाधिना सर्गे निमित्तं। स एव स्थितौ
॥सत्कार्य एष भुवनत्रयसंनिवेशो यस्येन्द्रियैस्त्वनुमृतानुमतयेन्द्रियाणि। ज्ञानेश्वतः श्वसनतो बलमोज ईहा।
सत्वादिभिः स्थितिलयोद्भवमादिकर्त्ता॥१०॥ ब्रह्मविष्णुरुद्राः। आदावभूच्छतधृतिः रजसास्य सर्गे विष्णुः
स्थितौ क्रतुपतिर्निजधर्मसेतुः। रुद्रोप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु॥११॥
विष्णुः सत्वेन सर्वसिद्धं। स्थितिकृत्त्वं सन्निधिमात्रेण धर्मप्रवृत्तिहेतुत्वात्। तदाह। क्रत्विति। क्रतुः श्रौतो धर्मः। निजः पांच
रात्रादिस्मृतः। सेतुर्विधारकः। स एव तमसा रुद्रः। अप्ययः प्रलयः इति एवं विधाः ब्रह्मादयः स्युः। ब्रह्मणस्तु रुद्रद्वयोरनुक्रम सततं प्रतिदि
पिसत्वलक्ष्यते। केवलयोरजस्तमसोरनन्तत्वेन प्रतिविंवायोगत्वात्। अत एव सत्वेन विष्णोर्वर्तितिनोक्तं। ब्रह्मिलः निमि॥११ नं प्रतिकल्पं वर्ष
॥४ एवं लजितानि पञ्चवक्त्राणि तत्र वक्तुर्णो ध्यानसिद्धये रूपाणि यथायथं व्याख्यानि। तत्रादौ निर्विशेषस्य मुमुक्षोः समाहितसिद्धो
सम्यग्मनुपाय मीक्षमाणस्य विश्वरूपधानतो [illegible] पुरुषरूपमाह। पुरुषेति॥

४ मत्वेक्षतधृतिः पुंश्चित्रांकेव परमेष्ठिनीति मेदिनीकरः

०मुक्तो ।। ननूलब्धप्रतिग्रहः । वामनं खर्वं । अद्भुतं यथा स्यात् । ननु खर्वस्यैव त्यानिछिन्नीस्यात् । नेत्याह । अनंतेति । अनंतत्वे ऋद्धिः वृद्धौ । त
त्राह । गुणेति । गुणोपाधिक्रमित्यर्थः । यत्र यस्मिन् भ्वादयो दश भ्वा सत अदृश्यंत । द्यौः स्वर्गः । विवराः पातालानि । अत्राधिष्ठानि
णमाह । क्रायइति ।। ।।क्रा विभूतिर्नैश्वर्यं । आर्त्विजीय इत्क्रत ।। आचार्यमित्रवारुणाकृतः । सदस्या उपद्रष्टारः तैसहि
तः । एतत्सर्वमस्य कं । भूतानि महांतिपंच । इंद्रियाणि दश । अर्थाः पंचतन्मात्राणि । आशयाः मनोबुद्धिरहंकारनाधिष्ठितय
।।पुरुषरूप।। तद्वामनं रूपमवर्धताद्भुतं हरेयनस्य गुणत्रयात्मकं । भूः खं दिशो द्यौर्विवराः पयो
८ मयस्तिर्यङ्नृदेवा ऋषयो यदासत ।।१२।। क्राये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसद ए
स्यएतत् । ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशय जीवयुक्तं ।। ।।१३।। ।।
निबलार्यंतच्चरणानि । जीवः पुरुषः । एतियुक्तं । पंचविधमाति तत्ताकमपरपदित्यर्थः । ददर्शेति सिद्धवदुक्तेर्भगवत्स
मादाद्दिव्यचक्षुरस्यानुमेयं । ननु सर्वस्यैव नगतो बलेः किं न तात्विकरूपोपलब्धिः ।। ।।तत्राह ।। गुणत्रयात्मकं । अधा
व्यधिजीयममत्वा गुणत्रयः । एतेनान्यापि त्रैगुण्यमाधिनविवेको न्नाधिकारी इत्युक्तं । एवं सामान्येन रूपमुक्त्वा पत्यत्र विसे
तदाह । रसामिति ।।

॥यस्याः पातालं। अवष्टम्भपदम्। अंघ्रौ तले अधः। अत्र शब्दः सर्वत्र वाक्यभेदार्थे योज्यः। पादयोरुपनीतये। महीं भ्रा
न्यधितान्। पतत्रिणः पक्षिणः जानु निजानुदेशे। मारुतगणः आवहादीनां मरुतां स्तोमः। इन्द्रसेनो वलिः॥ छ॥ वि
भुर्व्यापी। जघनमेव जाघनं। आत्ममुख्यान् दैत्यानित्यर्थः। कुजिष्णु कुजिघ्रदेशो बुः। कुजे वेकल्वेन वद्धव वचनायोगा
त्। उरुर्महान् क्रमः आक्रमणं यस्य सतथा। अक्षमालीनक्षत्रपंक्तिः॥छ॥ श्रोण्योः अहो हृपाद्भुतश्रवणः स्तिमित स्त्रियतया

॥यस्याम वष्टांघ्रितले यपादयोर्महीं महीध्रान्युरुषस्य जंघयोः। पतत्रिणो जानुनि विश्वमूर्ते
र्घोणे गणे मारुतमिंद्रसूनवः॥१४॥ संध्या विभोर्वास सि गुह्य ऐंद्रान् प्रजापतीन् जाघनमा
त्ममुख्यान्। नाभ्यां नभो कुजिष्णुः सप्तसिंधूनुरुक्रमस्योरसि चर्क्षमालां॥१५॥ हृदि धर्मं
मं स्तनयोर्मुरारेर्ऋतं च सत्यं च मनस्यथेन्दुम्। श्रियं च वक्षस्यरविंदहस्तां कंठे च सामानि
समस्तरेफान्॥ ॥छ॥ ॥ब॥ ॥छ॥ ॥ब॥ ॥

ज्ञानमुद्बोधयतीति मुकुंदः अगोति। धर्मं सत्यादिकं सिद्धं। ओतस्येग्रहणेन ग्रहणान्। ऋतं यथार्थवाक्यं। सत्यं तु
हितं। सत्यं भूतहितं प्रोक्तं मृतं मृदुं यथार्थवाक्यमित्युक्तेः॥ ॥छ॥ यद्वा ऋतं सूनृते। सत्यं समदृष्टिः सत्यं च सम
दर्शनं। ऋतं तु सूनृता वाणी त्युक्तेः। अरविंदहस्तामित्यनेन सर्वतत्वानां मूर्त्तत्वं ज्ञेयं। रेफाः स्तोत्राक्षराणि॥ ॥छ॥

यद्व

आम्रक।।भुजेषु अप्सासु इंद्रादानष्टे।।छ।।छंदांसिवेदादीन्।।वेदत्वाविशेषेपिसामवेदस्यकंठत्वमतनगत्वार्थं।तथ्यवेदानां
सामवेदोस्मीत्युक्तत्वात्।वक्त्रानाङ्गायत्र्यादीनिसप्तधातुषु।रसेरसनेंद्रिये।जलेशवत्तुण्णं।भुवौविधिनिषेधौ

।।इंद्रप्रधानानमरान्भुजेषुतल्लक्षणीयोःककुभोघ्राणमूर्द्धि।क्षेमोभुभेघ्रानूश्वसनंनासिका
9 यामक्ष्णोश्चसूर्येवदनेचवह्निं।।१६।।वाण्यांचछंदांसिरसेजलेशंभ्रुवोर्निषेधंचविधिं
चपक्ष्मसु।अहश्चरात्रिंचपरस्यपुंसोमन्युंललाटेधरएवलोभं।।१७।।स्पर्शेचकामंनृपरे ९
तसोऽनःपृष्ठेत्वधर्मंक्रमणेषुयज्ञं।छायासुमृत्युंहसितेचमायांतनूरुहेष्वोषधिजातयश्च।।।

आज्ञारूपो।पक्ष्मसुऊर्ध्वाधःस्थितेषुअक्षिलोमसु।अहःरात्रिंच।मन्युंरुद्रं।एवशब्दस्तत्वानांस्थाननियमार्थःप्रसे
कयोऽप्य:।।   ।।छ।।हेनृप।रेतसारेतासि।आर्षोप्रत्ययः।क्रमणेषुपादविक्षेपेषु।छायासुकनादीनां।हसितेहस
ने।तनूरुहेषुरोमसुओषधिजातीः।।

॥बुद्धो ऽजं ब्रह्माणं । देवादा प्राणेषु अन्तर्लोमेन्द्रियेषु । गणा अमयाः किं बहुना गात्रे देहे स्थित जंगमानि ॥ अमलं
मोहं । एवं ध्यानार्थं मूर्त्तिमुक्त्वा आयुधान्याह । सुदर्शनमिति सुदर्शनं मनस्तत्वमिति स हस्तनाम ज्ञानाख्ये । धनुरिन्द्रियार
हंकाररूपं । चक्रनाभि नररूपं प्रपंचं । तत्र त्रैलोक्यस्वामीति विष्णुधर्मोत्तरे । मन सि न्नु मे ...॥ ॥छ॥ पर्जन्योऽजे
मेघः । जलजः शंखः सत्त्वभूताद्यहंकारः । कौमोदकी बुद्धिः । तत्र च नाभि वेगाद्या बलिष्ठाय । असिर्नन्दकः । विद्या

॥ नदाश्च नाडीषु शिला नखेषु वृद्धावजं देवगणा नृषे श्वा प्राणेषु गात्रे स्थित जंगमानि अणद्वमात्रे
एवं विहङ्गमूर्त्ते ध्या ॥ १९ ॥ सर्वात्मना दंष्ट्रुवर्ननिता त्रपु सर्वेषु नाः अक्षमलमायुवर्ग । सुदर्शनं चक्रमसह्यते
जो धनुश्च शार्ङ्गस्तनयित्नुघोषं ॥ २० ॥ पर्जन्यघोषो जलजः पाञ्चजन्यः कौमोदकी विष्णुगदा तरस्विनी
। विद्याधरोऽसिः शतचन्द्र युक्तस्तूणोत्तमावजयसायकोऽस्य ॥ २१ ॥ ॥छ॥ ॥छ॥ ॥छ॥
धरः सर्वविद्यामयत्वात् । शतचन्द्रयुक्तः शतचन्द्राकाराणि बिंबानि यस्मिन्न्यस्तया । एतत्र तमो ... मयतूणोत्तमो वु
कर्ममयो । सायकाः शरा इन्द्रियरूपाः । तत्र चक्रमार्वोगदापद्मो स्वक्ष फलं ... धनुस्तूणो वर्त्मेदं दक्षिणादिक्रमे
णद्वयोर्द्वयोर्वा द्वाभ्यां स्थितः । यद्वे ... । एवमष्टभुजः । अथ यपविवान्दैवतान्याह । सुनन्देति ॥ ॥छ॥ ॥
ये०

सू२

श्रीभुक्रा० ॥मुख्यशब्दात्सुनंदजयविजयप्रबलोद्बलकुमुदकुमुदाक्षविष्वक्सेनपक्षिराजदेवजयेतसात्वतपुष्पदंतचंडप्रचंडबलमहाबला
र्हणानांसुभद्रश्यानांग्रहणं।एतेसर्वेभगवत्स्वरूपाएव।विनाश्रीगौडुक्कौस्कमान्।तेउपतस्थुःनिकटीभूयसेवांच
क्रुः।सहलोकपालाइतिसमासेनलोकपालानामप्राधान्यंदर्शयति।तेनतेबहिःपरिधौस्थिताः।पार्षदास्त्वंतःपर
रिधावितिभावः।एवंभूतैश्चिपुलत्वेनविनिर्दिष्टंध्यानचित्रमेकाग्रयति।स्फुरदिति॥ ॥छ॥किरीटादीनांसमानानांद्वं
द्वः।किरीटंमुकुटं।तथापारमेष्ठ्यंपदंमीनौमकरौ।तदाकारेरत्नाकृतिकुंडलेतेवसारस्ययोगौ।श्रीवत्सोरत्नुपाद
10 ॥सुनंदमुख्याउपतस्थुरात्मपार्षदमुख्याःसहलोकपालैः॥२२॥स्फुरत्किरीटांगदमीनकुं १०
डलश्रीवत्सरत्नोत्तममेखलांबरैः।मधुव्रतस्रग्वनमालयावृतोरराजराजन्भगवानुरुक्रमः॥२३॥
न्यासः।रत्नोत्तमःकौस्तुभःमत्वात्मज्योतिःस्तत्प्रमानुश्रीवत्सःअंबरंवस्त्रंतयर्द्दोमय।मधुव्रतैर्गुंजद्भिःस्रक्वैजयंतीय
स्यसतया।शाकःपार्थिवैर्नाइत्तरपदलोपः।सकलभूततन्मात्ररूपावनमालाऽलंपादलंबिनीसायातामाया।ए
तच्चसर्वंद्वादशे।भगवान्सजनीयसौंदर्यादिगुणवान्।एवंविश्वात्मकेभगवद्रूपेमनःप्रणिधायतच्चापानेजगद्गु
ग्रहलक्षणेप्रणिदध्यादित्याह।जितमिति॥ ॥छ॥

भगव

दि२

।।क्षितिंभूर्लोकं।पदापादेन।बलेःसंबंधिनं।नभः भुवर्लोकं।क्रमतःक्रमेण।द्वितीयपदे त्रिविष्टपंस्वर्लोकं विचक्रमे।
।।तृतीयाय पदाय।तदायं बलिसत्रायं।उरुक्रमस्येति।। ।।
अत्रउरुक्रमस्येत्युक्तनवाक्यान्वितमतिपत्यर्यमाकृष्यते।तृतीयायपदाय।तदायुंबलिसत्रायं।उरुक्रमस्येति।। ।।
अयोस्वर्लोकप्राप्तेनतयंश्च त्रिदुपर्युपरिगच्छन्महर्जनोत्यांतपसश्चपनंसत्यलोकंगतइत्ययः।सत्यमिति।अक्षुन्न
योप्रलासः सत्यलोकस्थाम।।त्यंतसप्तलोकक्रमितारं त्रिविक्रमांघ्रिं।सत्रदोघ्रब्रायो।हतस्यधामद्युतिः।तिरस्कृत
स्वर्लोकदीप्तिः।समाप्तुमहावित्रयणोयमित्यवधार्यमतएवाहत।। ।।मरीचिमिश्रोमिलितोयेषुतेतथा।तत्संहिताइत्य
र्थः।अबयःसप्तवाक्या:बृहद्व्रता:ब्रह्मचारिणः।देनदेव।योगिनोनिरूढावित्रहत्रय।वेदाऋगादयः।उपवेदाः
।।क्षितिंपदैकेनबलेर्विचक्रमेनभःशरीरेणदिवाछ्रवाङ्गिः।पदंद्वितीयंक्रमतस्त्रिविष्टपंनवैहृती
यायतदायमएवापि।।२४।।उरुक्रमस्यांघ्रिरुपर्युपर्यथोमहर्जनांत्यांतपसःपरंगतः।सत्यंसमीक्ष्याह्वर
मवोनरवेंदुनिर्हृतस्वधाममद्युत्यिपादृतोत्यगात्।।२५।।मरीचिमिश्राऋषयोबृहद्व्रताःसनंदनाद्यानर
देवयोगिनः।वेदोपवेदानियमान्विताऋत्वर्कतिहासोगत्रवाणसंहिता।।२६।।येयाप्येयोगसमीनदा
पिताःज्ञानाग्निनाविधितकर्मकल्मषाः।ववंदिरेयत्स्मरणानुरागतःश्चायंभुवंधामगतायकर्मकं।।२७।। ।।
आयुर्वेदगांधर्वधनुर्वेदाः।नियमाःशौचादयः।पंचायमाःअहिंसादयश्चान्वता:।तेवांगप्रकरणेघञ्मतो।तर्कोःषट्।इतिहासाःपुराणे
नानि।अंगानिव्याकरणादीनिषट्।पुराणानिसर्गादिलक्षणानि।संहिताश्चिवर्गशास्त्राणि।वेदाद्यधिष्ठात्रोदेवताश्चागमवह्न्यर्थः
।।ज्ञा।।योगसमाचरणेनसमाधियोगेनासंदीपितःसधुतिर्ययोज्ञानाग्निनानिर्धिनतेपलंकर्मकल्मषंपुण्यपापंयेस्तेतथा।।निधितेतिसा
येक्षत्वापिसमासश्चार्षः।अलुग्वा।ज्ञा।नाग्निदग्धपुण्यपापाःज्ञानिनःइत्यर्थः।त्वमिवववंदिरेयस्यस्मरणमाहात्म्यात्नूक्षम्यं

श्रीगुरुः॥ अथमन्त्रीयादिवंदनानंतरं। प्रोक्षमितायप्रोद्धीकृताय। अर्हणोदकमर्घ्यं। तत्त्वतात्पर्येण अभ्युपगमेनाभ्युक्षतवान्। भुविभ्रवाः
श्रमलब्धार्चिः। यन्नाम्नातिपित्वाश्चपिच्छस्यउत्थिता अर्घाह्वत्यर्थम्॥ ॥धातुग्रहणः कमण्डलुजलस्य धुनीगंगानूत्र। सायविज्ञ
पादप्रक्षालनकृतय। पवित्रतया। निमार्ष्टि विश्वो धयति। कीर्तिरिति मुक्तत्वायपावर्णत्वादिदृष्टिः। एवं धात्वा षोडशोपचारैः

॥अथाध्र्यपेयो नामितायाविष्णोऽनुपाह त्वत्पदजवोऽर्हणोदकं। समर्चोऽजनात्स्यगणात् भुविभ्रवाः यन्ना
म्नि पंकेनु हसमवाश्चयं॥२८॥ धातुः कमण्डलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेन्द्र स्वर
र्धुन्यभूत्रभसि सापतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः॥२९॥ ब्रह्मादयो लोकना ११
थाः स्वनाथायसमादृताः। सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये॥३०॥ तोये तोयैः समर्हणैः
स्रग्भिर्दिव्यगन्धानुलेपनैः। धूपदीपैः सुरभिभिर्लाजाक्षतफलांकुरैः॥३१॥ ॥छ॥ ॥छ॥

पूजां भावयेदित्याह। ब्रह्मादय इति॥ ॥छ॥ तोयादिभिर्बलिपूजामाजह्रुश्चक्रुः। संक्षिप्तात्मनः स्वस्य अयथाक्षिप्ता
दीनां विभूति ऐश्वर्यं येनमस्तया॥ यद्वा संक्षिप्ताल्पात्मनो विभूतिर्वैराजरूपवैपुल्यं येन तस्मै संक्षिप्तरूपाय त्वय्येव॥ ॥
अर्हणैः उपायनैः उक्ताः सम्पृहाः॥ ॥छ॥ ॥राम॥ ॥कृष्ण॥ ॥गोविंद॥ ॥राम

॥अथ दक्षिणमाह॥ जाम्बवानिति॥ विजयं जितं विष्णुनेत्यर्थोऽयं न। महानुत्सवो दिक्षु यस्मात् स जयात्॥ जां-
बवान् हि त्रिविक्रमं प्रदक्षिणीकृतवान्। सुघोषेण मया वैयतदा विष्णुः सनातनः प्रदक्षिणीकृतः पूर्वं क्रम-
मानोऽस्मि विश्वरूपमिति हि वैष्णवे तद्वाक्यं॥ ॥श्रु स्कं १ गा ज्ञाने॥ ८॥ २०॥ एवं त्रैगुण्यधारणा प्रथमभूमिकामुक्त्वा
तत्र स्थिरत्वे तस्यां द्वैगुण्यधारणां द्वितीयभूमिकामाह॥ ब्रह्मेत्यादि॥ ॥विष्णुपदं त्वं ब्रह्मा वायुरेवाथ शेषो वेदं च
पित्र्याणि प्रतीतिर्न्यायापि द्वयोरेवात्राभिनिवेष्टव्यं। इह द्वैगुण्यधारणायां विवर्जितत्वात्। विष्णुरूपस्य वर्जमाने-
त्वाच्च। पुनर्द्वयोर्युगपद्ध्यानानुपपत्तिः। हरिहरयोर्हि नानाध्यानादुपपन्नेः। वृषहंससुपर्णस्यान् रुद्रादीन्स्था-
॥स्तवनैर्नियतात्मस्तवदुर्द्धनिनिः स्वनैः॥ ३१॥ जाम्बवानृक्षाधिपतिर्मेधावी मतिमान्मनोजवः। विजयं
दिक्षु सर्वासु महोत्सवमघोषयत्॥ ३२॥ ब्रह्माविष्णुरुद्ररूपाणि। वृषहंससुपर्णस्थान् स्वैः स्वैश्चि-
ह्नैश्चविह्नितान्। कृपावलोकनेन हसद्वदनेनोपलक्षितान्॥ ३४॥ ॥छ॥ ॥छ॥ २
वीक्षेत्यन्वयः। तत्र वृषं खड्गखट्वाङ्गडमरुपरशुकपालालंकृतचतुर्भुजं चर्मवसनान् सर्पाभरणान् कपालविवि-
धभूषणं रुद्रमूर्तिं चिन्तयेत्। हंसमूर्तिं हंसाधिरूढां चतुर्मुखां चतुर्भुजां तप्तकाञ्चनवर्णां शुक्लवस्त्रालंकृतां विलासो-
पपिनाक्षीमिति वा। योगपद्मासनां जयामुकुटालंकृतां शङ्खचक्रगदापद्मधृतमेतल्लुप्तभावं ध्यानेति। कृपया अ-
वलोकः कृपावलोकः तेन हसद्वदनेन च उपलक्षितान् प्रसन्नत्वेन ज्ञापितान्॥ ॥छ॥

श्रीमुक्ता॰ ॥तेषां सोऽविषाप्रज्ञया प्रतिहते प्रतिघातनीते मुनिः अत्रिः॥ ॥अनुयुगं कल्पे कल्पे विशब्दो वै साहाय्ये पते प्रसिद्धाः। तेभ्यः स
कामादिक एवोपहूतः। स एवक्त इति मुख्यात्मि नेव कथनीय इत्याह॥ छ॥ प्रधान प्रकृष्टा धारणा। अचिन्तं चिन्तं कृत चिन्ती
कृतः। चिन्तेनैकेनातइत्यर्थः। प्रजननाय पुत्रोत्पत्त्यै। एकस्मिन्ध्याते पुनः त्रयः कथमत्रागता इति भूत। ब्रूत। अगोचराः
प्रसीदत प्रसादं कुरुत। इह त्रयाणामागमने। एतेन अत्रितुल्यो त्राधिष्ठाना तिल्लियं। अपि हि निजस्त्वमः प्रकृतिः प्रज्ञा स्र
मलार। यथा कृतः निजस्थ मयप्रकृत यः सम था ला न्यजं तितिहि। विस्तृत प्रजे मादानित्रि ये अपि प्रजे प्रसवद्धता। एवं मूर्त्तिद्वयथा

॥तत्को विषाप्रतिहते निमील्य मुनिरक्षिणी। चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः॥२५॥ वि
श्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः। ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्य १२
हं वस्तेभ्यः क एव भगवन्म इहोपहूतः॥२६॥ एको मयेह भगवान्विविधप्रधानैश्चित्तीकृतः प्रजनना
य कथं नु यूयं। अत्रागतास्तनुभृतां मनसोऽपि दूराद्ब्रूत प्रसीदत महानिह विस्मयो मे॥२७॥ यथा कृतस्ते
संकल्पो भाव्यं तेनैव नान्यथा। सत्संकल्पस्य ते ब्रह्मन्यद्वै ध्यायति ते वयम्॥२८॥

यमानेष्वजेदसावयेत्साहाय्यर्थेति॥ छ॥ नेत्वया। एवं यद्गोत्रितत्क्रमः। अन्यथा न त्वा वामेवेति यतस्त्वं सत्यसंकल्पः। अतस्त
वसंकल्पनगोमात्रादिति त्रयो वयमागताः इत्यर्थः। एकस्य वत्रिधाधिष्ठातृत्वात्। मैत्रेयो विदुरं॥ ॥इति श्रीकैवल्यदीपिका
यां बोपदेवविरचिते मुक्ताफले विद्योर्लक्षणं पादश्च॥ ॥एवं धारणाद्वयाभ्यासवलाक्रितननजस्तमस्कस्य मुमुक्षोः सत्वज
यार्थं शुद्धसत्वधारणां तृतीयामिवाऽमाह॥ ॥छ॥

॥ तत्र गत्वेदं श्वेतवनादिकमद्भुतोदद्दर्श । तत्र वंशोऽन्वयः । द्युमत्तमं शोभाढ्यं । भ्राजन्तो मणयो येषु स्तम्भसहस्रेषु तेः शोभि
तं यस्मिंस्तत्र वने अनन्तशेषसंज्ञं नालयं ददर्श । सहस्रमूर्द्धन्या अष्टायेफणापितामणयस्तेषां द्युतिः ॥ ॥ द्विगुणेप्सम
स्वापेक्ष । सितावलाच्छ्वेतपर्वतसदृशं । शितयो नीलाः कंठजिह्वाश्चयस्यस्तथा । तस्य शेषस्य योगः शयनं । विष्णु
प्रस्नेन धिष्ठातारं पुरुषं । अतएव विशेषणद्वयं । भक्तभावः प्रभावः । पुरुषोत्तमेषु ब्रह्मादिषु उत्तमं । मुक्तेषु
॥ तत्राद्भुतं वैष्णवं धुमत्तमं भ्राजन्मणिस्तम्भसहस्रशोभितं । तस्मिन्महासर्पमनन्तमद्भुतं सहस्रमूर्द्ध
न्यफणामणिद्युभिः ॥ ३९ ॥ विभ्राजमानं द्विगुणेक्षणोल्बणं सितावलाभं शितिकंठजिह्वं । ददर्श
तद्भोगसुखासनं विभुं महानुभावं पुरुषोत्तमोत्तमं ॥ ४० ॥ सान्द्राम्बुदाभं सुपिशङ्गवाससं प्रसन्नवक्त्रं
रुचिरायतेक्षणं । महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुंतलं ॥ ४१ ॥ प्रलम्बचार्वष्टभुजं
सकौस्तुभं श्रीवत्सलक्ष्मं वनमालयावृतं । सुनन्दनन्दप्रमुखैः स्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः ॥ ४२
वा नित्यमुक्तत्वात् । तथा च सूत्रद्वयं । तत्र निरतिशयं सर्वज्ञबीजं । स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् । दृश्यस्य चलोल
याराना ग्रहणम् ॥ छ ॥ सुपिशङ्गं पीतोज्वलं । आयतदीर्घे महामणीनां व्रातः स्तोमो यत्र किरीटकुंडलयोस्तयोः प्रभ
या परिक्षिप्ताः व्याप्ताः सहस्रं बहवः कुंतलाः केशा यस्य स तथा तं ॥ ॥ छ ॥ आयुधा देवविशेषाः आग्नेयं ॥ ॥

श्रीगुरुः। कीदृशं भ्रमजायकाल्संजातयाभ्रजामायाहं द्वैवेसि न नपुंसकत्वं। जम्बालोकस्वदार्विक्षतइतिवत्। अखिलर्द्धिभिः अणि
मादिसर्वसिद्धिभिः। परमेष्ठिनोपरमैश्वर्यवतोस्वामिने। अत्राधिकारिणमाह। यवेदइति। आत्मानंतस्येवकष्टत्वेनवे
लक्षणपात्रावान्। घटादिपादिवधूवत्तस्पदीपस्य। जिष्णुरर्जुनः सकृत्तद्दर्शनेनजातजयः। एतेनमुद्रुसत्वोत्राधिकारीस्तु
क्तः॥ गुरुः॥१०८॥ नच्चिदृशमेववोद्धिक्तरूपं नत्कथमन्यथातत्र नत्रोपवर्ण्यते तितत्राह। नेदृगेवइत्यादृरूपत्वान्। अत्र
हेतुमाह। इच्छैवरूपंयस्यसतथातस्यभावः। तस्माक्त्केवलं वयतुर्भुजाघाकारेणयविलमतासर्थः। अत्रैवमूलंयोजय।

13 ॥पुष्ट्याभिर्यापकाम्येजया रिवलर्द्धिभिर्निषेव्य मां नपरमेष्ठिनापार्थं। यवेद आत्मानमनंतमच्युतो जिष्णुश्च
तद्दर्शनेजातसाध्वसः॥४३॥ नेदृगेवइच्छानुरूपधारी॥ ॥त्वंभावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षि १३
तपथोननुनाथपुंसां। यद्यद्धियातउरुगायविभावयंति तत्तद्वपुः प्रणयसेसदनुग्रहाय॥४४॥ ॥ति॥

ति। त्वंभावेति॥त्व॥ हेउरुगायविज्ञोत्वंभावयोगेनपरिभाविते विशोधितेहृत्सरोजेआस्से। अनिव्यक्तसन्नवतिष्ठसे। तत्र
हेतुः श्रुतेनवयास्येक्षितोनिश्चितः पंथाःस्वरूपस्थितिर्यस्यसतथावेदोत्रप्रमाणमित्यर्थः। अतस्तेननुहेनाथ यद्यद्वपुःस्व
धियाविभावयंति विन्नयंति तत्तत्त्वंपुंसांप्रणयसेप्रकटयसि। व्यापकत्वेनहृदयस्थोपिनक्रैर्येन केनाप्याकारेण विषयीकृतस्तत्
दनुग्रहायप्रकटोसीतिभावः॥ ॥ब्रह्मा॥ ॥विष्णुः॥३॥ ॥ ॥ ॥ ॥किंचान्य
च्चेति॥ ॥

॥ तेत्वय्येव हेतुना अभिरूपाणि सुंदराणि । ननु रूपणाद्युपाधिना । स्वभावस्तु भगवानीसर्वेश्वरे ऽयं स्थानकाः स्महृर्यं तेनाभेव
तेरूपाणि ननु स्वतः सिद्धानि सेवशप्वार्थः अत उक्तं । इच्छानूपत्वादिति । अतुपिणः वक्तृतः अरूपोपि भक्तेच्छयारूपवानि ।
सर्वः कर्दमः कपिलम् ॥ २।२४॥ एवं भगवतः पूर्वप्रभेदानुक्तक्रमेणतोरूपतश्च विविच्यपर्वानामपि साम्येप्राप्ते उत्तराध
स्यावं विवेकमाह । शुद्धसत्वेति ॥ छ॥ शुद्धसत्वविष्णुरूपमेवोपास्यतमम् ॥ ८॥ तदेवाह । शुद्धं यज्जस्तमोभ्यां हितसत्वं यस्मि
न्विष्णुरूपं तत्तथा । तदेवउपास्यतमं । इदमेषामतिशयेनोपास्यतमम वर्थो तिशयः स चान्यसत्वापेक्षया जडरूपयतु ब्रह्म
उद्भरूपमुपास्यतमं । पुरुषरूपेरूपास्यमिति । अयमर्थः स्थूलसूक्ष्मक्रमेण बुद्ध्यायोऽर्थमवगाह तद्दृति प्रथमं त्रिगुणात्मि
॥ तान्येव तेभिरूपाणि रूपाणि भगवंस्तव । यानि यानि च रोचन्ते स्वजनानामरूपिणः ॥ ४॥ ५५॥ ॥ छ॥
तत्र च शुद्धसत्वं विष्णुरूपमेवोपास्यतमं ॥
के भगवद्रूपे मनः प्रणिधाय तत्र वास्थिरं सद्विगुणात्मके । ततः पन्नसत्वैकगुणे । ततश्च निर्गुणे सूक्ष्मे ब्रह्मणि प्रवेशयेदि
त्यनिरतिशयानंदलाभेन ध्यानफलकल्पतामेतीति । तेषामीसाक्षात् ध्यायिनो मृदुमध्याधिमात्रोपायत्वेन त्रयः । प्रत्येकं
मृदुमृद्वादिभेदेन नवस्युरिति योगशास्त्रे । तत्राद्ययोरवस्थाभेदाद् द्वैविध्यमुन्नेयः । अंतस्य तु भेदत्रयं एव
त्यति । एक एवास्य पादभेदान्नवविधत्वपर्यः । उक्तमर्थं द्रढयन्नाह ॥ ॥ सत्वं रज इति ॥ ॥ छ॥ ॥

श्रीतुक्त्वा॥ अस्य प्रपञ्चस्य स्थित्यादये स्थितिसृष्टिसंहारार्थं सत्त्वादियुक्तः संज्ञात्रयं धत्ते। तत्र सत्त्वतनोर्विष्णोः श्रेयांसि शुभफलानि स्युः
। खलु राद्धो निश्चये। सर्वातिशयं तमैश्वर्यं गमयन्ती सुपास्यतमत्वं प्रपद्यते। ततः सत्त्वसद्भावादन्येषामपि सत्त्वतनुत्वं। त
थाप्यब्जजो वायुमज इतिवत्सत्त्वमेव तनुर्यस्येति विशुद्धसत्त्वस्य। रजस्तमसोः सदपि सत्त्वं न फलप्रदं किं तु शुद्धसत्त्वमेवे
तिभावः॥ सूत्रः श्रोनम्॥१॥२॥ तदेवाह। सत्त्वमिति॥ सत्त्ववपुरिति सामानाधिकरण्येन स्थितो निमित्तं। श्रेयांसि कैवल्यं। उप
यन उपायभूत। तदाह। वेदेति। येन सत्त्ववपुषाश्रितेन जनस्त्वाबार्हणं पूजां समीहते सम्यक्करोति। शुद्धस्याविषयत्वाद्
॥सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते। स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः
14 ज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः॥५६॥ सत्त्वं विशुद्धमयते भगवान् स्थितो यानारिणां श्रेय उ १४
पायनं वपुः। वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते॥५७॥
सत्त्वोपहितं भजतीति भावः। क्रियायोगश्लोके। तत्र वेदादिभिश्चतुर्भिः क्रमादाश्रमिणः पूजयन्तीति चतुर्णां मुक्तिः। य
द्वा वेदेन वैदिकाः। क्रियया पाञ्चरात्राः। योगेन प्रकृतिपुरुषविवेकोपायेन सांख्याः। तपसा तपस्विनः। शैवाः पाशुप
ताश्च। समाधिना पातञ्जलाः। सत्त्वोपाधेर्वे तत्र ... तत्राभिधानमिति प्रागुक्तं। पर्यैवमार्गाः। अतो मार्गाप
वर्गविषयत्वेन पथ्यानां मुक्तिः। सत्त्ववपुरित्युक्तं। तदमृष्यमाणे प्रतिविपक्षे वा प्रमादः॥ सत्त्वं नयेदिति॥ ॥छ॥ ॥

॥ हे धातः शुद्धसत्त्वं विशुद्धसत्त्वं निजं वपुश्चेत् न स्वरूपं न स्याच्चेत् तर्हि विज्ञानं विशिष्टज्ञानं मार्जनं लोपश्च आपत्प्राप्नुयात् । लोके जात्यालिङ्
ग्येन प्रमाणैः निर्मलत्वान्न स्यादित्यर्थः । किंत्वशिष्यम् अज्ञानमपि नूनं संपेवत्यतत्त्वावेदकं । ननु प्रमाणरूप मित्यर्थः । ज्ञानं हि सत्त्वाद्गुणसं
ग्रते । तच्चेत् सत्त्वं नास्ति तदा ज्ञानमपि न स्यात् । दृश्यते च ज्ञानं । अतस्तत्सत्त्ववस्तु रित्यनुमीयसद्गुणाह । गुणप्रकाशैः सत्त्व
गन्धैर्विषयप्रकाशैः । ननु सत्त्वस्य जडत्वात् कुतः प्रकाशकत्वं । तत्राह । प्रकाशत इति । गुणस्य यस्य संबंधेन प्रकाशतेऽप्र
काशयति प्रकाशंतर्भावितणिजर्थत्वात् । येन वा प्रकाशकेन तेनेति परमतमुक्तं । वाशब्दो हि पंजीतनार्थः । सर्वेषां विद्युल्लिंग प्रकाशात्मक
मित्यर्थः । एवमपि सत्त्वमेव प्रकाशकं । ननु रजस्तमसी । तयोरप्यकर्तृत्वे न वित्ति संख्यानुपपन्नेः । यथा वा विनेजो दर्पणः
स्विद्यवप्राप्तुं रूपं मुखादिप्रकाशयति । न यदादि शुद्धसत्त्वं तर्हि सत्त्वयोगो नित्य एवेति न तत्त्वं कृद्द्यत आह ॥ न नामेति ॥ ॥
॥ सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं । गुणप्रकाशैरनुमीयते भवान्प्रकाशते यस्य च
येन वा गुणः ॥ ४० ॥ न नाम रूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः । मनोवचोभ्यामनुमेयवर्त्म
नो देव क्रियायां प्रतियन्त्यथापि हि ॥ ४१ ॥
नामरूपे यौगिके वक्तरूपे श्यामादि गुणः सौंदर्यादि । कर्म चरित्रं निग्रहानुग्रहरूपं । जन्म शरीरग्रहणं सहायैरेतायाः । नि
रूपितव्ये निरूपयितुमशक्ये । आर्षो ऽलोपः । नामादि पचंतत्र वक्तुं न शक्यते । कुतः साक्षिणः । त्वं हि ते षां हि साक्षी । द्रष्टा
द्रष्टुश्च दृश्यत्वानुपपत्तेः साक्षित्वमेव कुतः इति तत्राह । तस्येति । तस्य समाधौ स्थिराः तया तनुरूपमानस्य । अनुभूतवाचि
त्वाद्यास्य यच्छानपेक्षा । यथा ऽलक्ष्य विना भयपतिस्खलितामुक्तानि तेलोचनेषु मिदिश्यविधुर्वे क्रियंतामापादे । अनुभूतिमपकुर्वा
नं प्रत्याह । मन इति । पतस्यावर्तनमनोवचसां प्रसृतः सप्रासिद्धत्वादनुमानं । हे देव । अथापि एवमपि क्रियायां षोडशोपचा
चपूजायां प्रतियन्ति जानंति । वस्तुतस्तु सत्यं त्वदीयाद्यन्यत्र स्थिता । कल्पयेतात्पर्यः । ननु नामादेरवास्तवत्वे प्रकाशिव
त्वं न तत्त्वस्यात् तत्राह । अथापीति ॥

श्रीगुरु ॥ संस्मरायन्तन्यैः नृपालियेतिचक्षाराङ्गणकर्म्मजन्मानिव । आविष्टत्वमवस्थांतरावेशकारः । नच संसारः श्रयात्मकस्या
पिसत्त्वार्थहेतुत्वम् अनुसंधादेनिव क्षेयादिहेतुत्वमित्यर्थः । तस्मात्सिद्धमस्योपास्यतमत्वं अश्लाघाः कृष्णो ॥ १२ ॥ २ ॥
अधिमात्रोपायस्त्रिधेत्युक्तं । तत्र मृदु मिमात्रमाह । विष्णुरूपेपीति ॥ ॥ हसितस्यावच्छिन्नप्रकाशमात्रस्यत्वेननिरा

॥ एवं नृगणेनसंस्मरयन्त्विन्तयन्नामानि रूपाणि च मङ्गलानिते । क्रियासु यस्त्वच्चरणारविंदयोरा
विष्टचित्तोनभवाय कल्पते ॥ ५० ॥ विष्णुरूपेप्यवयवशो नृपक्रमेणपादादिहासितांतमुपास्यत
म ॥ तस्मिन् लब्धपदं चित्तं सर्वावयवसंस्थितं । विलङ्घ्यैकत्र संयुञ्ज्यादङ्गे भगवतो मुनिः ॥ ५१ ॥ सं १५
15 चिंतयेद्भगवतश्चरणारविंदं वज्राङ्कुशध्वजसरोरुहलांछनाढ्यं । उत्तुङ्गरक्तविलसन्नखचक्रवा
लज्योत्स्नाभिराहतमहद्धृदयान्धकारं ॥ ॥ ५२ ॥ ॥ ॥ ख ॥ ॥

कानसंनिकृष्टत्वात् । मूलमाह । तस्मिन्निति । तस्मिन्निति विष्णुरूपपदस्थैर्ये । विलङ्घ्य एकमंगविवेकेन लब्धो
त्तरोत्तरसंचिन्तयेदिति ॥ ॥ चक्रवालमंडलं महतोध्यातुः हृदयं । दक्षिणमंघ्रिं ध्यात्वा वामांगायाः प्रसवं वामं ध्या
यदित्याह । सव्येति ॥ ॥ ॥

॥सरित्प्रवरा गंगा।तीर्थं तारकं।अधिकृतेन कृतेन।श्यामा विल्वेशिवत्वे निमित्तोऽस्येत्ताशिवइति।तस्याघ्रद्वयादि
मेतत्तेणाप्युपलमात्रदग्धयोगः।समलपापं।निसृष्टं प्राहितं।जानुद्वयमिति॥ ॥अखिलस्य विधातुर्ब्रह्मणो॰
ऽनन्यापरवशभूतयापि संवाहितमित्यतिशयार्थं विशेषणानयं।ऊर्वोरित्यादानार्थे।गोविषेतिस्पर्शेन वानुपे
णएतत्परमसौकुमार्यार्थे।ऊरूइति॥ ॥छ॥ अधिऊर्ध्वजागे।क्षेजावलतेजश्च।व्यालं विविततस्वारू।विन्या
॥यक्षोवनिसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽस्तू।ध्यातुमनःशमलशै
लनिसृष्टवज्रं ध्यायेश्चिरं जगवतश्चरणारविंदं॥५३॥जानुद्वयं जलजलोचन याजनन्याल॰
क्ष्म्याऽखिलस्य सुरवंदितयाविधातुः।ऊर्वोर्निधाय करपल्लवरोचिषायत्संवाहितं हृदि
विभोर्भवस्य कुर्यात्॥५४॥ऊरूसुपर्णभुजयोरधिशोभमानावोजोनिधीअतसिकाकुसु॰
मावभासौ।व्यालंविपीतवसनं यासासिवर्तमानकांचीकलापपरिरंभि नितंबविंबम्॥५५॥ ॥
सविशेषाद्य।पत्नीतयवयवासस्यसिन्वर्त्तमानःवर्तुपरिवद्धोयः कांचीकलापःतस्य परिरंभःसर्घितःसंश्लेषो
यस्यास्तितत्।स्त्रीकटीवत्सौंदर्यं वक्तुं नितंबशब्दः॥ ॥छ॥

श्रीसुरूगागुहानाभ्रम्याश्रयः। यत्रकृदेश्यात्मयोनेर्ब्रह्मणः धिषणस्थानपद्मभासीत्। हरिन्मणिरूपोमरकतश्रेष्ठा
विवाय्यौसनौतयोर्द्वयी। व्यूढविशालवज्रइति॥ ॥ अयमनस्यविष्णोः महाविन्नूतेलक्ष्म्याः अधिवासस्था
नं। पुंसां किं पुनःस्त्रीणां। कौस्तुभस्याधिकोनमूषणमर्थः प्रयोजनं यस्य सतथा। कंठेनकौस्तुभः इत्य

॥नाभ्यंकुदच्चुवनकोशगुहोदरस्थंयत्रात्मयोनिर्धिषणाखिललोकपद्मं। व्यूढंहरिन्मणिवृ
षस्तनयोरमुष्यध्यायेद्द्वयंविशदहारमयूखगौरं॥५६॥ वक्षोधिवासमृषभस्यमहाविभू
तेःपुंसांमनोनयननिर्वृतिमादधानं। कंठंचकौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिल
लोकनमस्कृतस्य॥५७॥ बाहूंश्चमंदरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान्।
संचिंतयेद्दशशतारमसह्यतेजः शंखंचतत्करसरोरुहराजहंसम्॥ ॥५८॥ ॥छ॥ ॥

तिशायः। बाहूनिति॥ ॥परिवर्तनेनसव्यापसव्यभ्रमणेन। निर्णिक्तं शोधितं अधिलोकपालान्लोकपालाधिपा
त्। दशशतारंचक्रं। शंखस्यसर्वतः शौक्ल्येनमुखयमूलयोर्लौहित्येनचराजहंसोपमा। कौमोदकीमिति॥

कृष्ण

16 १६

दिग्धां लिप्तां । भटाः योद्धारः तेषां शोणितस्य कर्दमः । उपघुष्टां वाचालीकृतां चैत्यस्य जीवस्य । तत्त्वं कारणं परं ज्योतिस्तद्रू
पं मणिं कौस्तुभं ॥ भृत्येति ॥ ॥ छ ॥ वल्गितं चलनं ॥ ॥ यत् वदनाख्यं श्रीनिकेतं पद्मं अधिक्षिपत् विशेषणप्रधानो
॥ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन । मालां मधुव्रतवरूथगिरोप
घुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे ॥ ५ली ॥ भृत्यानुकम्पितधियेह गृहीतमूर्तेः संचिन्तयेद्भग
वतो वदनारविन्दं । यद्विस्फुरन्मकरकुण्डलवल्गितेन विद्योतितामलकपोलमुदारनासं ॥ ह० ॥ यच्छ्री
निकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुन्तलवृन्दजुष्टम् । मीनद्वयाश्रितमधिक्षिपदब्ज
नेत्रं ध्यायेन्मनोमयमतन्द्रित उल्लसद्भ्रु ॥ हृ ॥ तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमना
नाय निसृष्टमक्ष्णोः । स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विततभावनया गुहायां ॥ हय ॥
निर्दिष्टः । श्रीनिकेतत्वादिधर्मत्रयविशिष्टं त्रिपतालयेः । तत्र च भूत्या श्रीनिकेतनत्वस्याभिप्रायः । कुन्तलैरलिसुक
त्वस्य नेत्रद्वये तु मीनद्वययुक्तत्वस्य । मनोमयं मनसः परिणामम् ॥ ॥ छ ॥ ॥ तस्येति ॥ ॥ छ ॥ अनु
गुणितं युक्तं । विपुलो वृद्धः । गुहायां हृदि । हासमिति ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

आमुक्ता॥निजमाययाअस्यजगतःसंमोहनायरचितंहासंध्यायेत्।मुक्तानामपिसंमोहनमाह्लादितितत्संमोहनायप्रवृत्तस्यकामस्य
संतर्जनेनसंमोहनायरचितंभ्रूमंडलंध्यायेत्।अथवक्त्रेहसितमुक्त्वाअथवक्त्रेप्रहसितमाह॥ब॥प्रहसितंप्रकाशमात्रत्वा
त्तनिनाकारेणस्पष्टंहृते।अतएवध्यानायनन्यवधानाल्पत्वात्।प्रकुलयाअधरोष्ठस्यनासाअरुणयितालोहितेन।
नातन्नूनांद्विजानामेवकुंदकलिकानांपंक्तिर्यत्रतत्।देहकुहरेहृदयाकाशेअवसितस्यनिर्णीतस्यआर्द्रियात्रज्ञानान
दरसेनएयकृतद्यतिरिक्तेनदृष्टुमिच्छेत्।ध्यानमुक्त्वासमाधिमाह।एवमिति॥ ॥एवंदृश्यविशिष्टरूपंध्यानेनदृष्टोद्रष्ट
17 रिप्रतिलब्धभावःपुनर्लंघनतिःतद्रूपशनकैर्विमुक्तेस्यजति।यतस्ततश्चिरवाडिशंचपलस्यचित्तमत्स्यस्वंधनायमुपात्तं
॥हासंदनेरवनताखिलतौअलोकतीव्रशोकाब्धिसागरविशोषणमल्पदारं।संमोहनायरचितंनिजमाययास्य
भ्रूमंडलंमुनिकृतेमकरध्वजस्य॥६३॥ध्यानायनप्रहसितवक्त्रलाधरोष्ठनासारुणयिततनुद्विजकुंदपं १२
क्ति।ध्यायेत्स्वदेहकुहरेवसितस्यविष्णोःज्ञानार्द्रयाअर्पितमनानपृथग्दिदृक्षेत्॥६४॥एवंहृतोन्नगवर
तिप्रतिलब्धभावोज्ञानाद्रवद्धृदयउत्पुलकःप्रमोदात्।औत्कंठ्यवाष्पकलयामुहुरर्धमानस्तच्चापिचि
त्तवडिशंशनकैर्वियुंक्ते॥६५॥ ॥व॥१॥
॥यद्यपितस्मिन्नज्ञानागहृतिप्रमोदद्रवदृहृदयउत्पुलकश्चभवति।तथाप्यौत्कंठ्यवाष्पकलयामुहुरर्धमानश्चभवति।अत
स्तदपित्याज्यं।क्रियाजन्यंहितत्सुखं।क्रियाचाद्वितीयेज्ञेयेनस्यति।सज्ञानमौत्कंठ्येतेनदुःखेनदुःसहः।इदमत्रतत्वं।ध्ये
यालंबनस्यप्रत्ययस्यसदृशःप्रवाहःप्रत्ययान्तरेणापरामृष्टोध्यानं।ध्यानमेवध्येयाकारनिर्भासिप्रत्ययात्मकेनस्वरूपे
णशून्यमिवध्येयस्वभावापन्नंसमाधिरित्युच्यतइति॥अथास्ययोगस्यफलमाह।मुक्तेति॥ ॥व॥

॥यस्क्रेत्वुवरिशेमनःसहसानिर्वाणमृच्छति।नाशंप्राप्नोति।यत्रेधनाभावादर्विःकदायहियदामुक्ताश्रयंनिर्विषयत्वात्।निर्विष
यत्त्वाणकर्मत्वात्।विरक्तेछिन्नसंशयत्वात्।अत्रअस्यांदशायांपुरुषःआत्मानमन्वीक्षते।अनुपश्यमखण्डंपश्यति।अव्यवधा
नमव्यवधायकस्यमनसोऽभावात्।अतएवेदं।जीवपरयोर्भेदाभावात्।यतःप्रतिनिवृत्तोयत्रोदितस्तत्रैवलीनोगुणप्रवाहः।का
र्यकारणात्माचोयस्यसतया।सोपाधिः॥ ॥सोपिआत्मनस्वस्मिन्महिम्निनित्यनिरतिशयानंदघनेपदेव्यवसितःअवबुद्धःस
न्निष्ठोभवति।घटाकाशमिवमहाकाशे।कयामनसोनिवृत्त्या।एतयायोगाभ्यासलक्षणया।अतएववनमयापुनराह।त्रिशब्द।

॥मुक्ताश्रयंयर्हिनिर्विषयंविरक्तंनिर्वाणमृच्छतिमनःसहसाययार्चिः।आत्मानमत्रपुरुषोऽव्यवधा
नमेकमन्वीक्षतेप्रतिनिवृत्तगुणप्रवाहः॥६६॥सोप्येतयाचरमयामनसोनिवृत्त्यास्वस्मिन्महिर
म्न्यवसितःसुखदुःखबाह्ये।हेतुत्वमप्यसतिकर्तरिदुःखयोर्यत्आत्मन्विधत्तउपलब्धपरात्मका
ष्ठः॥६७॥ ॥छ॥

रहितया।सुखदुःखबाह्येपुण्यपापफलभोगाभावात्।हेतुत्वमसतिकर्तर्यविसिर्तकर्तृत्वोसात्विकोहंकारःसेवास
त्मायामयत्वात्।दुःखयोःसुखदुःखयोःयुगपदधिकरणवचनतायाद्वंद्वसमासनात्।यावोस्त्वयेतिबोद्धिति
वत्पद्धहेतुत्वस्यात्मन्विधत्ते।अहंकारकृतमात्मकृतंमन्यते।तदिदानींयेनकृतंतत्रैवावसितमित्यर्थः।यतःउ
पलब्धपरात्मकाष्ठःसाक्षात्कृतपरमात्मस्वरूपः।देहस्यास्यदेहाभिमानोनास्तीत्याह।देहमिति॥ ॥छ॥

श्रीमुक्त॥ तं देहं सिद्धो न विपश्यति। आत्मसमात्रेण पश्यति। किंतु स्थितमुत्थितं वेति। विवेकेन न पश्यति नो वेद यतः स्वरूपम
ध्यगमत्साक्षात्कृतवान्। परिकृतं तं प्रावृतं। तथा च श्रुतिः। तद्यथा हि निर्ल्वयिनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं
शरीरं शेते इति। ननु यस्याभिमानश्चेत्तद्देहस्तद्दैवपतेदिति। नेत्याह। देहोपीति॥ ॥ यावत्स्वारंभकं कर्मास्ति तावत्प्रति
समीक्षत एव। कुतः दैववशगो यतः। दैवं प्राक्कर्म खलु शब्दो हेतौ। न चात्मनास्याभिमानस्यास्य कुतः प्रवृत्तिनिवृत्ती
। तत्राह। सासुः सलिंगशरीरः। ननु ज्ञानोदयेपि चेत्कर्माणि न निवर्त्तन्ते तर्हि संचितैः कर्मभिर्देहांतराणि स्युः। तत्राह। त
मिति। तं देहं सप्रपंचं संस्कारेण पुनर्न भजते। तत्र हेतुः प्रतीति। स्वप्नमिव प्रतिबुद्धवस्तुः अयमर्थः। तस्य तावदेव चि
॥ देहं तु तं न चरमं स्थितमुत्थितं वा सिद्धो विपश्यति यतोध्यगमत्स्वरूपं। दैवादुपेतमथ दैववशा॥
दुपेतं वासो यथा परिकृतं मदिरामदांधः॥ ३६॥ देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्र १८
तिसमीक्षत एव सासुः। तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः॥ ३७॥
रं यावन्न विमोक्ष्ये अथ संपत्स्य इति श्रुतिः। न विमोक्ष्यते अथ तत्सत्संपन्नस्तत्प्राप्स्यति। उभयत्र तकारलोपश्छांदसः।
अस्मादवधिश्रवणात्प्रारब्धफलकर्मभोगादेव नश्यति। अनारब्धफलं तु ज्ञानादिति। एषा च फलोक्तिर्द्वितीययो
गे तीव्राधिमात्रस्य द्रष्टव्या। अन्यथाप्यनेनैव कृतार्थत्वादुत्तरयोगद्वयोक्तिर्वैयर्थ्यं स्यात्। अत एव तत्र फलं नोक्तं। अत्रानुफ
ल संकीर्तनमस्यैव तृतीयफलभूमिकामधिरूढस्यैव फलं न घटतीति दर्शयितुं। कपिलो देवहूतिं॥ ३॥ २७॥ अवयव
रूपक्रमेण विस्तरमित्युक्तं। तस्यावधिमाह। ...

अपोह्यस्वक्वापादौ ध्यायेत्तावद्यावद्यस्य दाम्पुद्धाति। ध्येयं विनावतिष्ठते। तदा गुल्फौ ध्यायेत्तावद्यदा प्रग्वन्न तद्वजीवे ध्यायेदि
त्यादिक्रमेण हृसितत्वक्वा निर्विषयेवावतिष्ठते स समाधिः। शुकः॥२॥२॥ अथ मध्याधिमात्रमाह। हृदिति॥ ७॥ अंतस्थं हृ
न्मध्यस्थं स्वचेता अधोमुखं सदतिता क्रोनप्राणवायोणोधालनाद्रऊर्द्ध्वमुखं ध्यात्वेत्यर्थः। उन्निद्रं उत्फुल्लं अष्टौ भूम्यादितत्त्वानि

॥ एकैकशोगानिधियानुभावयेन्न पादादियावद्धसितगदान्न्ततः। जितं जितं स्थानमपोह्यधारयेन्नपरंपरम्
द्धातिधीर्यथायथा॥ ७०॥ हृत्पुंडरीकमंतस्थमूर्द्ध्वनालमधोमुखं। ध्यात्वोर्द्ध्वमुखमुन्निद्रमष्टपत्रंसकर्णि
कं॥ ७१॥ कर्णिकायांन्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं। वह्निमध्येस्मरेद्रूपं ममैतद्ध्यानमंगलं॥ ७२॥ इं
द्रियाणींद्रियार्थेभ्यो मनसाकृष्यतन्मनः। बुद्ध्यासारथिनाधीरः प्रणयेन्मयिसर्वतः॥ ७३॥ ॥

पत्राणियस्यसतथा॥ ॥ ७॥ कर्णिकायांप्रणवं न्यसेन्न ध्यायेन्न। सत्वादिरूपाणि सूर्यादिबिंबानि। उत्तरोत्तरं क्रमेण एतन्न।
उक्तेष्वन्यतमं ध्यानिमंगलं स्वस्त्ययनं। ध्यानमुक्त्वा प्रत्याहारमाह। इंद्रियाणीति॥ ७॥ इंद्रियाणि अश्वान्मनसाप्रग्रहेणाधीर
हाविषयेभ्याकृष्य। सर्वतः सर्वावयववद्रूपेमयि। धारणामाह। तदिति॥ ॥ ७॥

७२

मुक्ता। एकत्रचरणादौ देशे घ चित्तस्य धारणेति हि पातंजले। एवं प्राङ्मुखादिशास्थितो तं ध्यायेत्। सुस्मितमिति हि विशेषणेता
त्पर्यं। समाधिमाह। तत्रेति॥ छ॥ तत्र स्थिते पदे स्थैर्ये व्योम्नि मायोपाधावीश्वरे। तत् व्योम। मदारोहो निरुपाधिमत्स्वरूपमा
रूढः न किंचिदपि चिन्तयेत्। ध्यातृध्येयविभागो मयि लज्जे दित्यर्थः प्रत्याहारधारणे ध्यानात्माकु पश्चात्समाधिः। यमादिवत्तु(
श्लोकार्थसिद्धा। तदेवमष्टांगो योगो निरूढो ह्यक्तः। तस्य फलमाह। एवमिति। एवं सन्नाभिरोगे समाधिप्राप्तामतिर्यस्य स तथा। मामा
॥तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत्। नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखं॥७४॥ तत्रल
19 ब्धपदं चित्तमाकृष्य व्योम्नि धारयेत्। तच्च त्यक्त्वा मदारोहो न किंचिदपि चिन्तयेत्॥७५॥ एवं समाहि १९
तमतिर्मामेवात्मानमात्मनि। विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतं॥७६॥ अन्तकाले तु पुरु
षः आगते गतसाध्वसः। छिंद्यादसंगशस्त्रेण स्पृहां देहे नु ये च तं॥७७॥ ॥छ॥ ॥छ॥
त्मानं जीवं मय्यात्मनि परमात्मनि सर्वात्मन् सर्वात्मके विचष्टे विशेषात्पश्यति। मामेव यातीति। जीवपरयोरभेदमुक्तः। ज्योतिरि
ति दृष्टान्तः। यथा प्रतिबिंबभूतं ज्योतिः उपाध्यंगमे बिंबीभ्याग्नयेत्यर्थः। अत्रापि फलोक्तिः प्राग्वत्। अतिक्रम्य उद्धवो॥११॥४
तीसाधिमात्रमाह। अन्तकाल इति॥ ॥गतसाध्वसः मृत्युमरणाद्भयः असंगशस्त्रेण असंगो हार्यगुरुषड्वस्तुपदेशदार्ढ्येनाति

प२ देहे अनु ये पुत्रकलत्रादयस्तेषु॥ ॥

प्रव्रजितः संन्यस्य निर्गतः धीरो योगरहस्याभिज्ञः॥ विधिवत्। नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं इति प्रकारेण॥ ॥
मनसा न तु वाचा। शुद्धं उदात्तादिधर्मैर्विरहितं। त्रिवृत् त्रिभिरकारोकारमकारैर्विनिर्ग्रथितम्॥ ब्रह्म ब्रह्मणः प्रथमं
रूपमक्षरं वर्णं परं। स्फोटात्मकं यच्छेत् स्थिरीकुर्यात्। जितश्वासः प्राणायामेन॥ ब्रह्मबीजमोङ्कारं अविस्मरन्॥ प्रा

॥गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः। शुचौ विविक्त आसीनो विधिवत्कल्पितासने॥१६॥
अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्। मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन्॥१७॥
नियच्छेद्विषयेभ्योऽक्षान् मनसा बुद्धिसारथिः। मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया॥ ॥१८॥
तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा। मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत्॥१९॥ ॥

णायामैः॥ ॥अक्षान् इन्द्रियाण्यश्वान्। मनसा प्रग्रहेण। कर्मभिः कर्मवासनाभिः आक्षिप्तं दूरं ततो नीतं। शुभार्थे धार
येत्। हृदयपुण्डरीके भ्रूमध्ये ज्योतिषि नाभिचक्रे। नासिकाग्रे। अन्यस्मिन्वा पापक्षयकरे वस्तुनि। चतुर्भुजादौ वा धी
या बुद्ध्या॥ ॥तत्रापि क्रमादेकैकमवयवं ध्यायेत्। अव्युच्छिन्नेन ध्येयान्तररहितेन। युक्त्वा समाधाय। न च निर्वि
षयं मनः॥ छ॥ ॥

मुक्ता० ४

मुक्ता० ॥ पदं विष्णोः निराकारस्य परं पदं स्वरूपं निरूप्यते। यत्र यस्मिं दशायां मनः प्रसीदति सत्वमात्रशेषं भवति क्षुते। अयमर्थः उत्क्रान्तिभूमि
काभ्यासबलात् सर्वेद्रिप्रत्यस्तमये संस्कारशेषे केवलसिनिरुद्धे असंप्रज्ञातसमाधिनानिर्विशेषचैतन्यलाभः ततश्च संसे
